Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-01**

# स्नातकपरीक्षाः—२०१६

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - कुवलयानन्दः-३

**दिनाङ्कः** - 29-03-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं दत्त** **10 x 1=10**

१. चिकुरप्रकारा जयन्ति ते विदुषी मूर्धनि यान् बिभर्ति सा- अत्र विदुषी का ?

२. दानं ददत्यपि जलैः सहसाऽधिरूढे- अत्र दानशब्दस्य अर्थद्वयं किम् ?

३. यदि शेषो भवेद् वक्ता कथिताः स्युर्गुणास्तव-अत्र कोऽलङ्कारः ?

४. रात्रिर्गमिष्यति भविष्यति सुप्रभातम्- इति पद्ये कोऽलङ्कारः ?

५. अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी- अत्र कोऽलङ्कारः ?

६. मीलन्ति यदि पद्मानि का हानिरमृतद्युतेः-अत्र कोऽलङ्कारः ?

७. कपिरपि च कापिशायनमदमत्त- इति पद्ये अत्र कोऽलङ्कारः ?

८. पद्मरागायते नासामौक्तिकं तेऽधरत्विषा- अत्र कोऽलङ्कारः ?

९. सखि पश्य गृहारामपरागैरस्मि धूसरा-अत्र कोऽलङ्कारः ?

१०. भुजङ्ग एव जानीते भुजगचरणं सखे! - अत्र कोऽलङ्कारः ?

**II. द्वित्रवाक्यैः समाधत्त** **05 x02=10**

१. ग्रन्थकाररीत्या काव्यलिङ्गार्थान्तरन्यासयोः को भेदः ?

२. तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका- अत्र कोऽलङ्कारः ? कुतः ?

३. चित्रोत्तरालङ्कारलक्षणमुदाहरणं च किम् ?

४. रत्नस्तम्भेषु सङ्क्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्वतः । अत्र कोऽलङ्कारः ? कुतः

५. कुवलयानन्दे आहत्य कति अलङ्काराः निरूपिताः ?

–अनुवर्तते

## III. यथारुचि अष्टौ विवृणुत । 08 x 05=40

१. विकस्वरः

२. मिथ्याध्यवसितिः

३. रत्नावली

४. चित्रोत्तरम्

५. स्वभावोक्तिः

६. भावशबलत्वम्

७. कल्पतरुकामदोग्ध्रीचिन्तिामणिधनदशङ्खानाम् ।
रचितो रजोभरपयस्तेजश्श्वासान्तराम्बरैरेषः ।। अलङ्कारोल्लेखपूर्वकं विवृणुत ।

८. सर्वदा सर्वदोऽसीति मिथ्या संस्तूयते बुधैः ।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ।। - अलङ्कारोल्लेखपूर्वकं विवृणुत ।

९. दम्पत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वचः
तत्प्रातर्गुरुसन्निधौ निगदतस्तस्यातिमात्रं वधूः ।
कर्णालम्बितपद्मरागशकलं विन्यस्य चञ्चूपुटे
व्रीडार्ता विदधाति दाडिमफलव्याजेन वाग्बन्धनम् ।। अलङ्कारोल्लेखपूर्वकं विवृणुत ।

१०. मुक्ताः केलिविसूत्रहारगलिताः सम्मार्जनीभिः कृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिबालारुणाः ।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् ।। अलङ्कारोल्लेखपूर्वकं विवृणुत ।

## IV. यथाग्रन्थं चतुरः अलङ्कारान् विवृणुत 04 x 10=40

१. अर्थान्तरन्यासः

२. ललितम्

३. व्याजोक्तिः

४. सङ्करः

५. काव्यलिङ्गम्

६. लेशः

७. रसवदादयः चत्वारः अलङ्काराः

८. प्रत्यक्षादयः चत्वारः अलङ्काराः

—०—

Total No. of Questions :7 ] [ Total No. of Printed Pages : 2

**Code No. : MR-03**

# स्नातकपरीक्षाः—२०१६

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - साहित्यदर्पणः-६, काव्यमीमांसा-३

**दिनाङ्कः** - 02-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

## Part-A

## साहित्यदर्पणः-६

**I.** पुनरुक्तवदाभास्य लक्षणमुक्त्वा उदाहरणे समन्वयं कुरुत । **10 x 1=10**

**II.** अन्त्यानुप्रासस्य लक्षणोदाहरणं प्रतिपादयत । **10 x 1=10**

**III.** श्लेषालङ्कारस्य लक्षणं किम् ? तस्य कति भेदाः ? विवृणुत । **10 x 1=10**

**IV. लघुटिप्पणी रचयत** **10 x 1=10**

१. शब्दालङ्कारः । २. पद्मबन्धः ।

## Part-B

## काव्यमीमांसा-३

**V. श्लोकत्रयं सप्रसङ्गं व्याख्यात ।** **03x0 5=15**

१. दीपयन्नाथ नभः किरणौघैः कुङ्कुमारुणपयोधरगौरः ।
हेमकुम्भ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः ॥

२. रविसङ्क्रान्तसौभाग्यस्तुषारावृतमण्डलः ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥

३. नमन्नारायणच्छायाच्छुरितः पादयोर्नखाः ।
त्वच्चन्द्रमिव सेवन्ते रुद्रः रुद्रेन्दवो दश ॥

४. शैलच्छलेन स्वं दीर्घं भुजमुत्तभ्य भूवधूः ।
निशासरव्याः करोतीव शशाङ्कतिलकं मुखे ॥

–अनुवर्तते

**VI. सविस्तरम् उत्तरं लिखत** **03x10=30**

१. कः कविसमयः ? विभागनिरूपणपूर्वकं जातिविषयकं लिखत ।

२. काव्यमीमांसायां देशसङ्ख्याविषये मतभेदं सोदाहरणं विशदयत ।

३. राजशेखरेण स्वग्रन्थे प्रतिपादितानि वसन्तमासचिह्नानि सङ्गृह्णीत ।

**VII. टिप्पणीं रचयत ।(त्रयाणाम्)** **03 x 05=15**

१. समक्रमः

२. विभूषणमोषः

३. काव्यमीमांसा

४. विशेषोक्तिः

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-04**

# स्नातकपरीक्षाः–२०१६

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - मृच्छकटिकम्

**दिनाङ्कः** - 04-04-2016 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. उत्तरं लिखत ।** **10 x 1=10**

१. धृतः शरीरेण मृतः स जीवति- कः ?

२. मृच्छकटिकस्य प्रणेता कः ?

३. रोहसेनः कस्य पुत्रः ?

४. मृच्छकटिकप्रकरणे नायकः कः ?

५. शर्विलकस्य प्रेयसी का ?

६. कः पातकी न भवति ?

७. छादिता शरदभ्रेण चन्द्रलेखेव दृश्यते - का ?

८. मृच्छकटिकप्रकरणे अङ्गी रसः कः ?

९. गगनतले वसन्तौ कौ विपत्तिं लभेते ?

१०. अयं हि पातकी विप्रो न वध्य- इति कः अब्रवीत् ?

**II. एषु चतुर्णां उत्तरं लिखत** **04 x 10=40**

१. कुतः वसन्तसेना चारुदत्तगृहं प्रविवेश ? स्पष्टयत ।

२. चारुदत्तस्य दारिद्र्यं वर्णयत ।

३. वसन्तसेनां हन्तुं कुतो यतते शकारः ? स्फुटयत ।

४. मैत्रेयेण दृष्टं वसन्तसेनाया गृहं वर्णयत ।

५. अधिकरणमण्टपं कुत आहूतः चारुदत्तः ? स्पष्टयत ।

६. पालकं राजानं आर्यकः कुतो ममार ? स्पष्टयत ।

–अनुवर्तते

७. चारुदत्तस्य गृहे कः अचोरयत् ? विशदयत ।

८. कः कर्णाट-कलह-प्रयोगं करोति ? किमर्थम् ? विवृणुत ।

**III. अष्टानां सप्रकरणं भावार्थं लिखत ।** **8x 5=40**

१. गुणाः खल्वनुरागस्य कारणं न पुनर्बलात्कारः ?

२. न युक्तं परकलत्रदर्शनम् ?

३. नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः ।

४. मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ।

५. पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिश्यते ।

६. नहि कमलं मधुपाः परित्यजन्ति ।

७. अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ।

८. जलं कूलावपातेन प्रसन्नं कलुषायते ।

९. अपेयेषु तडागेषु बहुतरमुदकं भवति ।

१०. साहसे श्रीः प्रतिवसति ।

**IV. उत्तरं लिखत ।** **5x 2=10**

१. रूपकस्य कति भेदाः सन्ति ?

२. चारुदत्तः कुत्र वसति स्म?

३. अपरं षष्ठं महापातकं किमस्ति ?

४. सुखं कदा शोभते ?

५. मृच्छकटिकस्य सप्तमाङ्कस्य नाम किम् ?

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : BSSA-01**

# स्नातकपरीक्षा:—२०१६

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - २, पत्रिका -३

## विषयः - कुवलयानन्दः-२

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येनोत्तरं लिखत ।** **10 x 1=10**

१. पूतनामारणख्यातः- अत्र सभङ्गश्लेषं दर्शयत ।

२. किं भृङ्ग सत्यां मालत्यां केतक्या कण्टकेद्धया ?- अत्र कोऽलङ्कारः ?

३. यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह-अत्र कोऽलङ्कारः ?

४. तन्मे ब्रूहि कुरङ्ग कुत्र भवता किन्नाम तप्तं तपः ? इदं को वदति ?

५. आक्षेपलक्षणं किम् ?

६. विभावनायाः कति प्रभेदाः सन्ति ?

७. कारणमालालक्षणं किम् ?

८. सङ्कोचपर्यायो नाम कः ?

९. कयोः विरोधं विकल्पालङ्कारः ?

१०. काव्यार्थापत्तिरित्यत्र काव्यशब्दः कुत उपात्तः ?

**II. द्वित्रवाक्यैः समाधत्त ।** **05 x 02=10**

१. प्रस्तुतालङ्कारः कुत्र प्रसरति ?

२. आक्षेपः कतिविधः ?

३. अन्योन्यालङ्कारस्य लक्षणमुदाहरणं च वदत ।

४. एकावल्यलङ्कारे गृहीतमुक्तरीतिर्नाम का ?

५. पुरुषमभिजातं कथयति- किं किम् ?

–अनुवर्तते

## III. यथारुचि अष्टौ उत्तरयत । 08x 05=40

१.श्लेषप्रभेदान् सङ्क्षेपेण वदत ।

२. कस्ते शौर्यमदो योद्धुं त्वय्येकं सप्तिमास्थिते ।
सप्तसप्तिसमारूढा भवन्ति परिपन्थिनः ।। -सप्रसङ्गं व्याख्यात ।

३. परिम्लानं पीनस्तनजघनसङ्गाद् उभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ।।
-सप्रसङ्गं व्याख्यात ।

४. अपीतक्षीबकादम्बमसंमृष्टामलाम्बरम् ।
अप्रसादितसूक्ष्माम्बु जगदासीन्मनोहरम् ।- सप्रकरणं व्याख्यात ।

५. शस्त्रं न खलु कर्तव्यमिति पित्रा नियोजितः ।
तदेव शस्त्रं कृतवान् पितुराज्ञा न लङ्घिता ।। सप्रकरणं व्याख्यात ।

६. विशेषालङ्कारं विवृणुत ।

७. सारं विवृणुत ।

८. परिसङ्ख्यां विवृणुत ।

९. समुच्चयं विवृणुत ।

१०. निद्राति स्नाति भुङ्क्ते चलति कचभरं शोषयत्यन्तरास्ते
दीव्यत्यक्षैर्न चायं गदितुमवसरो भूय आयाहि याहि ।
इत्युद्दण्डैः प्रभूणामसकृदधिकृतैर्वारितान् द्वारि दीना-
नस्मान् पश्याब्धिकन्ये सरसिरुहरुचामन्तरङ्गैरपाङ्गैः ।। सप्रसङ्गं व्याख्यात ।

## IV. यथाग्रन्थं चतुरः विवृणुत 04x 10=40

१. श्लेषः २. अप्रस्तुतप्रशंसा

३. व्याजस्तुतिः ४. पर्यायोक्तम्

५. विभावना ६. विषमम् ७. समम्

—०—

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : BSSA-02**

# स्नातकपरीक्षाः–२०१६

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - २, पत्रिका -४

### विषयः - काव्यप्रकाशः-२

**दिनाङ्कः** - 05-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येनोत्तरं लिखत ।** **10 x 1=10**

१. पिनाकिनः समागमप्रार्थनया किं शोचनीयतां गतम् ?

२. कस्मिन्नुल्लासे शब्दार्थचित्रनिरूपणं कृतम् ?

३. व्याकरणलक्षणहीनत्वमिति दोषस्य नाम किम् ?

४. 'कटिस्ते हरते मनः' इत्यत्र को दोषः ?

५. कार्मुकस्य क्रेङ्कारः, मधुलिहां कः ?

६. यशोऽधिगन्तुं सुखलिप्सया वा इत्यत्र युक्तः पाठः कः ?

७. नवरसरुचिरा का ?

८. श्रुतिकटुत्वादिनां अनुकरणे तु अदोषत्वमुत दोषत्वम् ?

९. आह्लादकत्वं माधुर्यं कुत्र द्रुतिकारणम् ?

१०. हारादिवदलङ्काराः के ?

**II. श्लोकचतुष्टयं सप्रसङ्गं व्याख्याय विशेषं आविष्कुरुत ।** **04 x 05=20**

१. भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन ।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥

२. तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्त्रिभिरिष्यते च या ।
प्रयान्ति तामाशुगतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥

३. सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः ।
विधीयमानमप्येतन्न भवेत्कर्मबन्धनम् ॥

–अनुवर्तते

४. सुधाकरकराकारविशारदविचेष्टितः ।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥

५. तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गश्च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्तनम् ॥

## III. एतान् प्रश्नान् उत्तरयत । 03x 10=30

१. गुणीभूतव्यङ्ग्यस्य सप्रभेदं स्वरूपं लिखत ।

२. वाक्यमात्रगामिदोषाः के ? यथामति त्रयाणां विवरणं कुरुत ।

३. माधुर्यौजःप्रसादव्यञ्जकाः वर्णाः के ? प्रतिपादयत ।

## IV. एतेषु षड्दोषान् उपपादयत 06x 05=30

१. सन्दिग्धत्वम्

२. श्लिष्टत्वम्

३. विरुद्धमतिकृत्वम्

४. निहतार्थत्वम्

५. अवाचकत्वम्

६. उपहतलुप्तविसर्गता

७. हतवृत्तत्वम्

८. पतत्प्रकर्षः

९. समाप्तपुनरात्तत्वम्

## V. कारिकाद्वयं विवृणुत । 02x 05=10

१. ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥

२. केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥

३. वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित् ।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥

—०—

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : BFSA-02**

# स्नातकपरीक्षाः—२०१६

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

**भागः - २, पत्रिका -४**

**विषयः - काव्यप्रकाशः**

**दिनाङ्कः** - 05-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एषु पञ्च प्रश्नाः समाधेयाः ।** **05 x 06=30**

१. मङ्गलपद्यं व्याख्याय कीदृशं मङ्गलं तदिति विचारयत ।

२. काव्यं कुतोऽभ्यसनीयं करणीयं च ? विशदयत ।

३. काव्यनिर्माणे आवश्यकानि कारणानि कानि ? विमृशत ।

४. काव्यलक्षणं सदलकृत्यं विचारयत ।

५. काव्यप्रभेदान् नामतो निर्दिश्य व्यङ्ग्यकाव्यं सोदाहरणं निरूपयत ।

६. लक्षणा नाम का ? सा कदा आश्रयणीया ।

७. गौणी-शुद्धाविभागे मानं किम् ? सोदाहरणं विवृणुत ।

८. शब्दे वाचक-लक्षक-व्यञ्जकत्ववैलक्षण्यं सोदाहरणं विशदयत ।

९. रसविषये भट्टलोल्लटमतं यथाग्रन्थं विवृणुत ।

१०. विप्रलम्भशृङ्गारो नाम कः ? तस्य पञ्च विधा नाम्ना निर्दिशत ।

**II. एकवाक्येनोत्तरं लिखत ।** **10 x 01=10**

१. काव्यप्रकाशस्य कर्ता कः ?

२. काव्यप्रकाशे कति अध्यायाः सन्ति ?

३. शब्दस्य आदिमा शक्तिः का ?

४. कालिदासस्य काव्यरचनया किं प्रयोजनं जातम् ?

५. शक्तिर्निपुणतेत्यादौ शक्तिर्नाम का ?

६. मम्मटस्य काव्यलक्षणं किम् ?

–अनुवर्तते

७. प्रथमं ध्वनिरिति पदं कैः प्रयुक्तम् ?

८. तात्पर्यवृत्तिं के अङ्गीकुर्वन्ति ?

९. चतुष्टयी शब्दानां प्रवृत्तिरिति को वदति ?

१०. 'गङ्गायां घोषः' इत्यत्र लक्षणाप्रयोजनं किम् ?

**III. प्रश्नस्य सप्रसङ्गमुत्तरं लिखत ।** **1x 10=10**

१. 'शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः'- कारिकामिमां सम्पूर्णां विलिख्य, देश-काल-व्यक्तीः उदाहरणे सङ्गमयत ।

**IV. द्वयोः उत्तरं लिखत** **02x 05=10**

१. सम्भोगशृङ्गारस्य विवरणं सलक्ष्यं कुरुत ।

२. हास्यरसस्य ग्रन्थोक्तोदाहरणं विलिख्य व्याख्यात ।

**V. एषु चतुर्णां सान्वयं सप्रसङ्गं तात्पर्यं लिखत ।** **04x 10=40**

१. यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतस्समुत्कण्ठते ।

२. ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥

३. विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयापि यम् ।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती ॥

४. मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया ।
तद्भण किं करणीयमेवमेव न वासरः स्थायी ॥

५. पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥

६. श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥

७. एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ॥

८. उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम् ॥

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSA-01**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए. — विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

## भागः - १, पत्रिका - १

## विषयः -रसगङ्गाधरः—१

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. द्वयोः सविस्तरमुत्तरं लिखत ।** **02 x15=30**

१. शयिता सविधेऽप्यपीश्वरा सफलीकर्तुमहो मनोरथान् ।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ॥
इति पद्ये किं व्यङ्ग्यम् ? समर्थयत ।

२. अभिनवगुप्तस्य मतेन रसस्य स्वरूपं विशदयत ।

३. विरुद्धरससन्निवेशनप्रकारं सोदाहरणं निरूपयत ।

४. भावोदयादेः भावध्वनितो न व्यतिरिक्तत्वमिति ग्रन्थकृन्मतं सयुक्तिकं विवृणुत ।

**II. क) त्रयाणां सङ्क्षिप्तमुत्तरं लिखत** **03 x 05=15**

१. रसवद्वाक्यं काव्यमिति विश्वनाथस्य मतं विशदय्य प्रत्याख्यात ।

२. जगन्नाथस्य मतेन काव्यस्य लक्षणं किम् ? विशदीकुरुत ।

३. करुणारसः सोदाहरणं निरूप्यताम् ।

४. भावोदयं सलक्षणोदाहरणं स्फुटयत ।

५. किं नाम भावशबलत्वम् ? उदाहरणे लक्षणं सङ्गम्यताम् ।

**ख) पद्यत्रयस्य तात्पर्यं विलिख्य तत्रत्यं विशेषं सयुक्तिकमाविष्कुरुत** **03 x 05=15**

१. पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥

२. तल्पगतापि च सुतनुः श्वासासङ्गं न या सेहे ।
सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति ॥

३. मलयानिलकालकूटयो रमणीकुन्तलभगिभोगयोः ।
श्वपचात्मभुवोर्निरन्तरा मम जाता परमात्मनि स्थितिः ॥

—अनुवर्तते

४. चराचरजगज्जालसदनं वदनं तव ।
गलद्गगनगाम्भीर्यं वीक्ष्यास्मि हृतचेतना ॥

५. यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः ।
सङ्कुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः ॥

## III. उत्तरं लिखत । 05x 02=10

१. ग्रन्थकारेण काव्यस्य लक्षणं पर्यन्ते कथं परिष्कृतम् ?

२. उत्तममिति काव्यभेदस्य लक्षणं किम् ?

३. अधममिति काव्यभेदस्योदाहरणं किम् ?

४. मङ्गलपद्यं समग्रं लिखत ।

५. भट्टनायकस्य मतेन रसविषये कति व्यापाराः ? के च ते ?

## IV. सङ्क्षिप्तमुत्तरं लिखत । 10x 01=10

१. 'काव्यमुच्चैः पठ्यते' इति व्यवहारात् काव्यशब्दशक्तिः कुत्र सिद्ध्यति ?

२. जगन्नाथस्य मतेन काव्यस्य कारणं किम् ?

३. ग्रन्थकारस्य मतेन प्रतिभा नाम का ?

४. भट्टनायकस्य रसविषये को वादः ?

५. वामनेन काव्ये शब्दार्थगतत्वेन कति गुणा अङ्गीक्रियन्ते ?

६. स स्थायी लवणाकरः- कुतः ?

७. द्रौपद्याः प्रथमा दृशः पाण्डुपुत्रेषु कीदृश्यः पतन्ति ?

८. अप्पय्यदीक्षितैः निश्शेषच्युतचन्दनमिति पद्यं कस्यां कृतौ विचारितम् ?

९. क्रोधः कस्य रसस्य स्थायी भावः ?

१०. भावस्य लक्षणं किम् ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFSA-02**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्–अलङ्कारशास्त्रम्

## भागः - १, पत्रिका - २

## विषयः -ध्वन्यालोकः–१

**दिनाङ्कः** - 29-03-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. द्वयोः सविस्तरमुत्तरं लिखत ।** **02 x15=30**

१. तदभाववादिनाममी विकल्पाः सम्भवन्ति- के ते ? विवृणुत ।

२. वस्तुरूपस्य प्रतीयमानस्य विधिप्रतिषेधादिरूपत्वेन वाच्यादन्यत्वं सोदाहरणं प्रतिपादयत ।

३. रसादिः कुत्र ध्वनिर्भवति ? कुत्र चालङ्कारः ? सोदाहरणं विशदयत ।

४. रूपकादिरलङ्कारवर्ग एति यथार्थताम्-कथम् ? सोदाहरणं स्फुटयत ।

**II. क) त्रीणि वाक्यानि सप्रसङ्गं व्याख्यात** **03 x 05=15**

१. स हि कदाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः ।

२. लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः ।

३. प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम् ।

४. अनेन हि व्यङ्ग्यधर्मान्तरपरिणतः सञ्ज्ञी प्रत्याय्यते, न सञ्ज्ञिमात्रम् ।

५. स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ।

**ख) त्रीणि पद्यानि सप्रसङ्गं व्याख्यात** **03 x 05=15**

१. शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
सुमुखि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥

२. गगनं च मत्तमेघं धारालुलितार्जुनानि च वचनानि ।
निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशा ॥

३. आहूतोऽपि सहायैरोमित्युक्त्वा विमुक्तनिद्रोऽपि ।
गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति ॥

–अनुवर्तते

४. सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥

५. दैवायत्ते फले किं क्रियतामेतावत्पुनर्भणामः ।
रक्ताशोकपल्लवाः पल्लवानामन्येषां न सदृशाः ॥

## III. उत्तरं लिखत । 05x 02=10

१. ग्रन्थकारेण कृतमङ्गलपद्यं किम् ?

२. भक्त्या ध्वनिर्न लक्ष्यते-कुतः कुतश्च ?

३. कीदृशः शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयो भवति ?

४. शृङ्गारस्याङ्गिनः कीदृशोऽनुप्रासो न प्रकाशकः ?

५. तत्पूर्णं ध्वनिलक्षणम्- तत् किम् ?

## IV. सङ्क्षिप्तमुत्तरं लिखत । 10x 01=10

१. ध्वन्यालोकस्य लोचनमिति व्याख्यानं केन कृतम् ?

२. अभाववादः कतिविधः ?

३. महाकवीनां वाणीषु प्रतीयमानं वस्तु अङ्गनासु किमिव भाति ?

४. आलोकार्थी जनः कस्यां यत्नवान् भवति ?

५. अविवक्षितिवाच्य इति कस्य ध्वनेः नामान्तरम् ?

६. महाकवीनां सरस्वती अलोकसामान्यं कमभिव्यनक्ति ?

७. अङ्गाश्रिताः के तावत् कटकादिवत् मन्तव्याः ?

८. ध्वन्यात्मभूते शृङ्गारे कस्य निबन्धनं शक्तावपि प्रमादित्वम् ?

९. यत्र च मातङ्गगामिन्यः शीलवत्यश्च प्रमदाः- अत्रालङ्कारः कः ?

१०. तस्मात् प्रवादमात्रं ध्वनिरिति केषामुपसंहारवाच्यम् ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : MFSA-03**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः -प्राकृतप्रकाशः सेतुबन्धं च

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. प्राकृतरूपाणि ससूत्रं साधयत** **05 x02=10**

१. ईश्वरः २. उत्सवः ३. गौरवम्

४. चतुर्दशी ५. कौरवः

**II. षट् सूत्राणि व्याख्यात** **06x 05=30**

१. उ सु मु विध्यादिष्वेकस्मिन् । २. न्तमाणौ शतृशानचोः ।

३. इदीतः पानीयादिषु । ४. उत ओत् तुण्डरूपेषु ।

५. सर्वादेर्जस एत्वम् । ६. आत्मनो अप्पाणो वा ।

७. शेषादेशयोर्द्वित्वमनादौ । ८. भुजादीनां त्त्वातुमुन्तव्येषु ।

९. निरो माङो माणः । १०. अत ओत् सोः

**III. एतेषु प्रसङ्गद्वयमुत्तरयत** **02x 15=30**

१. ग्रन्थोक्तदिशा शरत्कालं वर्णयत ।

२. 'संस्कृतात् प्राकृतं श्रेष्ठं ततोऽपभ्रंशभाषणम्' विवृणुत ।

३. 'हनूमद्दर्शनेन रामव्यापारः कीदृश आसीत्'- विशदयत ।

४. कपिसैन्येन समुद्रतीरप्राप्तिप्रकारं वर्णयत ।

**IV. छायानिर्देशपूर्वकं सप्रकरणं व्याख्यात** **05x 02=10**

१. अहिणवरारद्धा चुक्कक्खलिएसु विहडिअपरिट्ठविआ ।
मेत्ति व्व पमुहरसिआ णिव्वोढुं होइ दुक्करं कव्वकहा ॥

२. सोह व्व लक्खणमुहं वणमाल व्व विअडं हरिवइस्स उरम् ।
कित्ति व्व पवणतणअं आणव्व बलाइँ से विलग्गइदिट्ठी ॥

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MFSA-04**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्–अलङ्कारशास्त्रम्

## भागः - १ , पत्रिका -४

## विषयः - कादम्बरी

**दिनाङ्कः** - 31-03-2016 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षिप्तमुत्तरं लिखत ।** **10 x01=10**

१. कथारम्भे प्रयुक्तम् अस्तीति पदं कुत्रान्वेति ?

२. कः पुरुषोत्तमस्य प्रतिनिधिरिव आसीत् ?

३. गद्यकाव्यरचयितारः प्रमुखास्त्रयः के ?

४. हारीतः कस्य सुतः ?

५. शुकनासः आचाराणां........?

६. तारापीडः कस्मिन् राज्यभारमारोप्य कर्तव्यशेषमपरमपश्यत् ?

७. बृहद्रथतनयस्य नामधेयं किम् ?

८. विलासवती अनवरतवाच्यमानाः काः शुश्राव ?

९. सुरवनिताकरपरिभ्रष्टः अमरपतिकुमारसदृशः कः ?

१०. लोपामुद्रायाः आर्यपुत्रः कः ?

**II. वाक्यचतुष्टयं सप्रसङ्गं व्याख्यात** **04x 05=20**

१. किमर्थमन्तर्गतगुरुशोकभारमन्थरमशब्दं रुद्यते ?

२. देव सम्पन्नाः सुचिरादस्माकं प्रजानां च मनोरथाः ।

३. सत्योऽयं लोकप्रवादो यद्विपद्विपदं सम्पत् सम्पदमनुबध्नाति ।

४. सर्वथा नमोऽस्मै रूपान्तरधारिणे भगवते चन्द्रापीडच्छद्मने पुण्डरीकेक्षणाय ।

५. अनुज्झितधवलतापि सरागेव भवति यूनां दृष्टिः ।

–अनुवर्तते

**III. सविस्तरं त्रयाणामुत्तरं लिखत ।** **03x 10=30**

१. तारापीडस्य विलासं यथाग्रन्थं वर्णयत ।

२. तारापीडः कुमारं चन्द्रापीडं प्रति किम् आदिदेश ?

३. चन्द्रापीडस्य विजययात्राम् उपस्थापयत ।

४. अच्छोदसरोवरस्य वैशिष्ट्यं पतिपादयत ।

**IV. गद्यभागं सप्रसङ्गं व्याख्यात** **1x 10=10**

क्रमेण च तं समासादिविग्रहमनङ्गमिवावतीर्णं नगरमार्गमनुप्राप्तमवलोक्य सर्व एव परित्यक्तसकलव्यापारो रजनिकरोदयपरिबुध्यमानकुमुदवनानुकारी जनः समजनि । सत्यस्मिन् मुखकुमुदकदम्बकविकृताकृतिः कार्तिकेयो विडम्बयति कुमारशब्दम् । अहो! वयमतिपुण्यभाजो यदमानुषीमस्याकृतिमन्तःसमारूढप्रीतिरसनिस्यन्दविस्तारितेन कुतूहलोत्तानितेन लोचन-युगलेनानिवारिताः पश्यामः । सफला नोऽद्य जाता जन्मवत्ता इति तं वदन्नारचित-प्रणालाञ्जलिर्नगरलोकः प्रणनाम । सर्वतश्च समुपावृत्तकपाटपटप्रकटवातायनसहस्रतया चन्द्रापीड-दर्शनकुतूहलान्नगरमपि समुन्मीलितलोचननिवहमिवाभवत् ।

**V. द्वयोः टिप्पणीं कुरुत** **02x 05=10**

१. कादम्बरी

२. वैशम्पायनः

३. जाबालिः

४. इन्द्रायुधः

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MFSAG-05**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः -२ , पत्रिका -५

### विषयः - स्वशास्त्रेतिहासः

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षिप्तमुत्तरं लिखत** **10x01=10**

१. वक्रोभक्तिः काव्यजीवितमिति केनोक्तम् ?

२. विश्वनाथोक्तं काव्यस्वरूपं किम् ?

३. दीनारलक्षेण प्रत्यहं कृतवेतनः - कः ?

४. दशरूपकस्य कर्ता कः ?

५. नाट्यशास्त्रे कति अध्यायाः सन्ति ?

६. क्षेमेन्द्रेण कः सम्प्रदायः उपस्थापितः ?

७. रुद्रभट्टेन लिखितः ग्रन्थः कः ?

८. आलङ्कारिकविषयोपेतं प्रसिद्धं पुराणं किम् ?

९. भोजेन रचितौ लक्षणग्रन्थौ कौ ?

१०. शब्दव्यापारविचाराख्यो ग्रन्थः केन लिखितः ?

**II. चतुर्णामुत्तरं लिखत** **04x 05=20**

१. भामहस्य काव्यालङ्कारग्रन्थस्य परिचयं कुरुत ।

२. आनन्दवर्धनोक्तं ध्वनिसिद्धान्तं लिखत ।

३. काव्ये कति भेदाः ? मतभेदेन विषयम् उपस्थापयत ।

४. मुनेः रससूत्रं बहुभिः बहुधा कथं विवृतमिति लिखत ।

५. जगन्नाथस्य वैशिष्ट्यं उपवर्णयत ।

–अनुवर्तते

**III. सविस्तरम् त्रयाणामुत्तरं लिखत** 03x 10=30

१. काव्यप्रयोजनं शास्त्रप्रतिपादितक्रमेण विवृणुत ।

२. साहित्यदर्पणे प्रतिपादिता विषयाः के ?

३. अलङ्कारसम्प्रदायस्य आशयं लिखत ।

४. महिमभट्टेन व्यक्तिविवेकग्रन्थे आक्षिप्ता विषयाः के ?

**IV. त्रयाणां टिप्पणीं कुरुत ।** 03x 05=15

१. विष्णुधर्मोत्तरपुराणम्

२. वामनः

३. अप्पय्यदीक्षितः

४. अर्थालङ्कारः

**V. चतुर्थं पदं लिखत ।** 05x 01=05

१. शारदातनयः - गोपालः । जयदेवः..............।

२. भानुदत्तः - रसमञ्जरी । कर्णपूरः...............।

३. गुणाः - शौर्यादिवत् । अलङ्काराः..............।

४. भारविः -किरातार्जुनीयम् । भट्टिः.................।

५. सूर्यशतकम् -मयूरकविः । अमरुशतकम्...........।

—o—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSA-01**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

## भागः -१ , पत्रिका -१

## विषयः - व्यक्तिविवेकः

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. द्वयोः सविस्तरमुत्तरं लिखत** **02x15=30**

१. ध्वनिकारिकायां शब्दो नोपादेय इति ग्रन्थकारेण कथमुपपादितम् ?

२. शब्दानां प्रवृत्तिनिमित्तं किम् ? मतभेदेन विचारयत ।

३. वस्तुमात्रप्रतीतौ एकान्तरितत्वं द्व्यन्तरितत्वं च सोदाहरणं प्रतिपादयत ।

४. ध्वनिलक्षणे तदः पुंस्त्वं द्विवचनं वाशब्दश्चैतेषामयुक्तत्वं समर्थयत ।

**II. क) कारिकात्रयं सप्रसङ्गं व्याख्यात** **03x 05=15**

१. उक्तं गुणीकृतात्मत्वं यदर्थस्य विशेषणम् ।
गमकत्वान्न तत्तस्य युक्तमव्यभिचारतः ॥

२. श्रुतिमात्रेण यदर्थस्य तादर्थ्यमवसीयते ।
तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम् ॥

३. घटतीति घटो ज्ञेयो नाघटन् घटतामियात् ।
अघटत्वाविशेषेण पटोऽपि स्याद्घटोऽन्यथा ॥

४. स्वाभाविकं ध्वनेर्युक्तं व्यञ्जकत्वं न दीपवत् ।
धूमवत् किन्तु कृतकं सम्बन्धादेरपेक्षणात् ॥

५. प्रसिद्धं मार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये ।
अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरुदाहृदा ॥

**ख) पद्यत्रयस्य तात्पर्यं विलिखवक्य तत्रत्यं विशेषं सयुक्तिकमाविष्कुरुत** **03x 05=15**

१. सहसा यशोऽभिसर्तुं समुद्यतादृष्टदर्पणा मम धीः ।
स्वालङ्कारविकल्पप्रकल्पेन वेति कथमिवावद्यम् ॥

२. सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

–अनुवर्तते

३. अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत्कुमारी ।
नासौ न काण्यो न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ॥

४. अकृत्वा परसन्तापमगत्वा खलु नम्रताम् ।
अनुत्सृज्य सतां वर्त्म यत्स्वल्पमपि तद्बहु ॥

५. पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वकम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ॥

## III. उत्तरं लिखत । 05x 02=10

१. प्रतीयमानापेक्षं पौर्वकाल्यं त्तवो विषय इत्यङ्गीकारे किं प्रयोगजाम् अनुपपन्नं भवति ?

२. साध्यसाधनभावमूलस्य अविनाभावनिश्चयस्य ज्ञाने त्रिविधं प्रमाणं किम् ?

३. वाचो गुणीकृतार्थत्वं न सम्भवति जातुचित्-कुत्र ?

४. यत्रार्थः शब्दो वा इति कारिकायां वाशब्दस्य कः कोऽर्थः सम्भवितुमर्हति ?

५. ग्रन्थकारस्य मतेन कीदृशः कविव्यापारः काव्यमित्युच्यते ?

## IV. सङ्क्षिप्तमुत्तरं लिखत 10x 01=10

१. कुत्र ध्वनेरन्तभार्वं कर्तुं महिमा व्यक्तिविवेकं कुरुते ?

२. ग्रन्थकारस्य मतेन समासोक्त्यादिषु वाच्यस्य प्राधान्यं वस्तुगत्या किमपेक्षया ?

३. शुक्लो नील इति गुणशब्दः, दण्डी विषाणीति कः शब्दः ?

४. 'अश्वति बालेयः' इत्यस्यार्थः कः ?

५. यदि नामानि सत्वप्रधानानि तर्हि आख्यातं कीदृशम् ?

६. क्रियाशेषोपजनितसम्बन्धावच्छेदहेतवः के ?

७. ध्वनिकारिकायां ग्रन्थकालेण कति दोषाः उद्भाविताः ?

८. अभिधेयेन सम्बन्ध इत्यादिना प्रकारेण लक्षणा कतिधा भवति ?

९. 'विषं भक्षय मा चास्य गृहे भुङ्क्थाः' इत्यत्र कोऽर्थः प्रतीयते ?

१०. व्यक्तिविवेके प्रथमविमर्शस्य नाम किम् ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSSA-02**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

## भागः -१ , पत्रिका -२

## विषयः - रसगङ्गाधरः-२ काव्यालङ्कारे पञ्चमाध्यायश्च

**दिनाङ्कः** - 29-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. अन्तिममनहपाय द्वयोरुत्तरं लिखत** **02x15=30**

१. उपमालङ्कारे साधारणधर्मः कतिविधः ? नाम्ना निर्दिश्य तान् सोदाहरणं निरूपयत ।

२. रत्नाकरोक्तम् अनन्वयलक्षणं विशदय्य प्रत्याख्यात ।

३. स्मृतिः सादृश्यमूला या वस्त्वन्तरसमाश्रा ।
स्मरणालङ्कृतिः सा स्याददव्यङ्ग्यत्वविशेषिता ।। इति दीक्षितोक्तं स्रणालङ्करलक्षणं विशदीकुरुत ।

४. खड्गबन्धं शूलबन्धं च सोदाहरणं सचित्रं च निरूपयत ।

**II. क) त्रीन् अलङ्कारान् सलक्षणोदाहरणं स्फुटीकुरुत** **03x 05=15**

१. उपमा २. उपमेयोपमा ३. उदाहरणम्

४. सन्देहः ५. अर्धभ्रमबन्धः

**ख) पद्यत्रयस्य तात्पर्यं विलिखक्य तत्रत्यं विशेषं सयुक्तिकमाविष्कुरुत** **03x 05=15**

१. कुचकलशेष्वबलानामलकायामथ पयोनिधेः पुलिने ।
क्षितिपाल! कीर्तयस्ते हारन्ति हरन्ति हीरन्ति ।।

२. भुवनत्रितयेऽपि मानवैः परिपूर्णे विबुधैश्च दानवैः ।
न भविष्यति नास्ति नाभवन्नृप यत्ते भजते तुलापदम् ।।

३. अगाधं परितः पूर्णमालोक्य स महार्णवम् ।
हृदयं रामभद्रस्य सस्मार पवनात्मजः ।।

४. कमलावासकासारः क्ष्माधृतिफणीश्वरः ।
अयं कुवलयस्येन्दुरानन्दयति मानवान् ।।

५. मामभीदा शरण्या मुत्सदैवारुक्प्रदा च धीः ।
धीरा पवित्रा सन्त्रासात्रासीष्ठा मातरारम ।।

–अनुवर्तते

## III. उत्तरं लिखत । 05x 02=10

१. 'अद्य या मम गोविन्द! जाता त्वयि गृहागते' इति वाक्यं केन कं प्रति उक्तम् ?

२. अरविन्दमिव सुन्दरं मुखमिति वाक्यात् कीदृशो बोधो भवति ?

३. द्राक्षेव मधुरं वाच्यमित्यत्र को दोषः ? कथम् ?

४. 'सविता विधावति विधुरपि सवितरति' इति वाक्यस्यार्थः कः ?

५. सावयवरूपकस्य लक्षणं किम् ?

## IV. सङ्क्षिप्तमुत्तरं लिखत 10x 01=10

१. चित्रमीमांसायाम् अप्पय्यदीक्षितैः उक्तमुपमायाः प्रथमं लक्षणं किम् ?

२. 'सर्प इव शान्तमूर्तिः श्वेवायं मानपरिपूर्णः' इत्यत्र शान्तमूर्तिशब्देन विवक्षितोऽर्थः कः ?

३. 'वागिव मधुरा मूर्तिर्मूर्तिरिवात्यन्तनिर्मला कीर्तिः' इत्यत्र उपमायाः कः प्रभेदः ?

४. 'मुनिः श्ववदयं भाति सततं पर्यटन्महीम्' इत्यत्रोपमायां को दोषः ?

५. अनन्वयालङ्कारे किं व्यज्यते ?

६. सर्वथैवोपमानिषेधः कोऽलङ्कारो भवति ?

७. परम्परितरूपकस्य लक्षणं किम् ?

८. एकस्योपमेयस्य बहूनामुपमानानां निर्देशे रूपकं किमित्युच्यते ?

९. सौजन्यचन्द्रिकाचन्द्रो राजा– अत्र रूपकस्य कः प्रभेदः ?

१०. 'नयनाभ्यां मीनवती सुन्दरी' इत्यत्र तृतीयाविभक्तेरर्थः कः ?

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MSSA-03**

# स्नातकोत्तरपरीक्षा:—२०१६

## एम्.ए. — विद्वदुत्तमा - द्वितीयवर्षः

### शास्त्रम्— अलङ्कारशास्त्रम्

### भागः -१ , पत्रिका -३

### विषयः - ध्वन्यालोकः-२

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. एषु द्वयोः उत्तरं सविस्तरं स्फुटं लिखत** **02x15=30**

१. रसाः कति ? तेषां परस्परविरुद्धत्वं कथं सम्भवति इति सोदाहरणं विवेचयत ।

२. वाच्यव्यङ्ग्ययोः भेदः कथं भवतीति यथाग्रन्थं विशदयत ।

३. न्यक्कारो ह्ययमेव इति पद्यं विलिख्य तत्र विद्यमानान् व्यञ्जकान् सम्यक् प्रतिपादयत ।

४. रसानां सन्निवेशे परहिर्तव्या विरोधांशाः के ? कथम् ?

**II. त्रीणि पद्यानि सप्रसङ्गं व्याख्यात** **03x 05=15**

१. या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।।

२ धृतिः क्षमा दया शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ।।

३. शिखिपिच्छकर्णपूरा जाया व्याधस्य गर्विणी भ्रमति ।
मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम् ।।

४. अनवरतनयनजललवनिपतनपरिमुषितपत्त्रलेखं ते ।
करतलनिषण्णमबले वदनमिदं कं न तापयति ।।

५. मुहुरङ्गुलिसंवृताधरौष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ।।

**III. उत्तरत** **02x 05=10**

१. ध्वनिव्यञ्जकाः के के ? तत्र पद-प्रबन्धयोः व्यञ्जकत्वं सोदाहरणं विवृणुत ।

२. रामायणे प्रधानः रसः कः ? कथं विचारयत ।

—अनुवर्तते

## IV. कारिकात्रयं सप्रसङ्गं व्याख्यात 03x05=15

१. रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः ।
औचित्यवाान्यस्ता एता वृथयो द्विविधः स्थिताः ॥

२. प्रकारोऽन्यो गुणीभूतव्यङ्ग्यकाव्यस्य दृश्यते ।
यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात् प्रकर्षवत् ॥

३. अस्फुटस्फुरितं काव्यतत्त्वमेतद्यथोदितम् ।
अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः ॥

४. अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी ।
नूतने स्फुरति काव्यवस्तुनि व्यक्तमेव खलु सा  न दुष्यति ॥

५. प्रबन्धे मुक्ते वापि रसादीन् बन्धुमिच्छता ।
यत्नः कार्यः सुमतिना परिहारे विरोधिनाम् ॥

## V. एकवाक्येनोत्तरं लिखत 10x01=10

१. महाभारते प्रधानः रसः कः ?

२. रसथभङ्गस्य कारणं किम् ?

३. गुणीभूतव्यङ्ग्यम् इत्यस्य विग्रहः कः ?

४. सङ्करसंसृष्ट्योः भेदः कः ?

५. उत्साहस्थायिकः रसः कः ?

६. नव रसाः के के ?

७. स्थायिभावाः के के ?

८. भरतस्य रससम्बन्धि सूत्रं किम् ?

९. चित्रकाव्यस्य भेदौ कौ ?

१०. श्रुतिकटुत्वं कुत्र दोषः ? कुत्र च गुणः ?

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages : 2

**Code No. : MSSA-04**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

## भागः -१ , पत्रिका - ४

## विषयः - वेणीसंहारनाटकम्

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. उत्तरयत** **05x02=10**

१. सङ्ग्रामाध्वरदीक्षितः कः ?

२. प्राज्ञाः केभ्यः न बिभ्यति ?

३. वेणीसंहारनाटके प्रधानरसः कः ?

४. पाण्डुतनयाः केन सह नन्दन्तु ?

५. धीरोदात्तनायकस्य लक्षणं किम् ?

**II. षण्णामेव सावतरणं भावार्थं लिखत** **06x 05=30**

१. क्रुधा सन्धिं भीमो विघटयति यूयं घटयत ।

२. क्षयः प्राणानां नः कुरुपतिपशोर्वाऽद्य निधनम् ।

३. तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ।

४. दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ।

५. उदासीनेषु युष्मासु मम मन्युः न पुनः कुपितेषु ।

६. त्वं दुर्योधनकेसरीन्द्रगृहिणी शङ्कास्पदं किं तव ।

७. यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः ।

८. धृतायुधो यावदहं तावदन्यैः किमायुधैः ।

९. त्वं दुःखप्रतिकारमेहि भुजयोर्वीर्येण बाष्पेण वा ।

१०. स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ।

–अनुवर्तते

**III. द्वयोः सविस्तरम् उत्तरं लिखत** **02x 15=30**

१. वेणीसंहारनाटके तृतीयाङ्कस्य औचित्यं विवृणुत।

२. भीमदुर्योधनयोः गुणशीलादिकं विवेचयत।

३. 'निवापाम्भः पूर्वं पिबसि कथमेवं त्वमधुना' इति कथयतो युधिष्ठिरस्याभिप्रायं सम्यग्विवृणुत।

**IV. 'वेणीसंहारम्' इति नाटकस्य नाम्नः औचित्यं प्रतिपादयत।** **03x10=10**

—०—

Total No. of Questions : 4 ]  [ Total No. of Printed Pages : 1

**Code No. : MSSAG-05**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

## भागः -१ , पत्रिका -५

## विषयः - काव्यालङ्कारसूत्रवृत्तिः

**दिनाङ्कः** - 01-04-2016 ]  [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ]  [ Max. Marks : 80

---

**I. उत्तरं लिखत** **05x02=10**

१.नयापनययोः परिज्ञानं कया भवति ?

२. काव्यालङ्कारसूत्रवृत्तौ कति अधिकरणानि सन्ति ?

३. पदार्थनिश्चयः कस्मात् भवति ?

४. काव्याङ्गानि कानि ?

५. गुणस्वरूपं किम् ?

**II. षट् सूत्राणि सोदाहरणं व्याख्यात** **06x 05=30**

१. विलरायमानादिषु क्यङ् निरूप्यः।

२. हानिवदाधिक्यमप्यङ्गानां विकारः।

३. वलेरात्मनेपदमनित्यम् ज्ञापकात्।

४. सद्रावित्येकशेषोऽन्वेष्यः।

५. सम्बन्धसम्बन्धेऽपि षष्ठी क्वचित्।

६. न कर्मधारयो बहुव्रीहिप्रतिपत्तिकरः।

७. न पादादौ खल्वादयः।

८. न पादान्तलघोर्गुरुत्वं च सर्वत्र।

९. नैकं पदं द्विः प्रयोज्यं प्रायेण।

१०. प्रतिभादयः प्रज्ञादिषु।

**III. द्वयोः सविस्तरम् उत्तरं लिखत।** **02x 15=30**

१. अर्थगुणान् सोदाहरणं स्पष्टयत।

२. वाक्यदोषान् सोदाहरणं विवृणुत।

३. पदार्थदोषाः कति ? सोदाहरणं प्रतिपादयत।

४. वामनमतरीत्या काव्यस्यात्मा कः ? विशदयत।

**IV. शब्दगुणाः कति ? सोदाहरणं प्रतिपादयत** **01x1 0=10**

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : BFSA-01**

# स्नातकपरीक्षाः–२०१६

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - २, पत्रिका -३

### विषयः -कुवलयानन्दः (१-२५अलङ्काराः)

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं दत्त** **10 x 01=10**

१. कुवलयानन्दस्य मूलग्रन्थः कः ?

२. कर्पूरन्ती दृशोर्मम- इति उपमायाः कस्य प्रभेदस्य दृष्टान्तः ?

३. प्रतीपे कति प्रभेदाः सन्ति ?

४. 'प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति'- अत्र कोऽलङ्कारः ?

५. 'अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः'- अत्र कोऽलङ्कारः ?

६. विनोक्तिलक्षणं किम् ?

७. 'शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः' अत्र कोऽलङ्कारः ?

८. पदार्थवृत्तिनिदर्शना नाम का ?

९. प्रतिवस्तूपमायाः लक्षणं किम् ?

१०. अतिशयोक्तौ विषयनिगरणं किम् ?

**II. द्वित्रवाक्यैः समाधत्त** **05x 02=10**

१. बिम्बप्रतिबिम्बभावो नाम कः ?

२. 'प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा'- अत्र दृगब्जेनेत्यत्र कः समासः ? कुतः ?

३. तुल्ययोगितादीपकयोः को भेदः ?

४. 'पुरा यत्र स्रोतः पुलिनमधुना तत्र...' इति पद्ये किं प्रस्तुतम् ? किमप्रस्तुतम् ?

५. परिकराङ्कुरस्य लक्षणमुदाहरणं च किम् ?

–अनुवर्तते

## III. यथारुचि ससन्दर्भमष्टौ व्याख्यात 08x05=40

१. परस्परतपःसम्पत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥

२. गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥

३. हालाहलो नैव विषं विषं रमा जनाः परं व्यत्ययमत्र मन्वते ।
निपीय जागर्ति सुखेन तं शिवः स्पृशन्निमां मुह्यति निद्रया हरिः ॥

४. यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥

५. यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम् ।
न हि कस्तूरिकामोदः शपथेन विभाव्यते ॥

६. सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥

७. उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयन् समृद्धीनां फलं सुहृदनुग्रहः ॥

८. मन्ये शङ्के ध्रुवं प्रायोनूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥

९. पलाशमुकुलभ्रान्त्या शुकतुण्डे पतत्यलिः ।
सोऽपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति ॥

१०. गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः ।
यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकम् ॥

## IV. यथाग्रन्थं चतुरः अलङ्कारान् सप्रभेदान् विवृणुत 04x10=40

१. उपमा    २. रूपकम्    ३. अपह्नुतिः    ४. उत्प्रेक्षा

५. अतिशयोक्तिः    ६. निदर्शना    ७ समासोक्तिः    ८. प्रतीपम्

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : MR-02**

# स्नातकपरीक्षाः—२०१६

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - साहित्यदर्पणः

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं दत्त** **10 x 1=10**

१. कः सतामेति ?

२. 'प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषा मतम्'-अत्र चर्वणा नाम का ?

३. 'अविकत्थन' इति कस्य नायकस्य लक्षणम् ?

४. हाव-हेला-शोभादयः नायिकायाः कीदृशाङ्काराः ?

५. दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति ।
प्रच्छन्नं वा भ्रमन्तं वातिक्रान्तं पश्यति प्रियम् ।। इयं कारिका कस्मिन् प्रकरणे वर्तते ?

६. प्रतिनायकलक्षणं किम् ?

७. शृङ्गारशब्दलभ्यार्थः कः ?

८. वीररसः कतिविधः ?

९. ध्वनिकाव्यलक्षणं किम् ?

१०.गुणीभूतवव्यङ्ग्ये कति प्रभेदाः सन्ति ?

**II. द्वित्रवाक्यैः समाधत्त** **05 x02=10**

१. चमत्कारो नाम कः ?

२. साधारणीकृतिव्यापारेण किं भवति ?

३. अभिसारिकायाः लक्षणं किम् ?

४. उद्दीपनवविभावो नाम कः ? के उद्दीपना भवन्ति ?

५. संलक्ष्यक्रमव्यङ्ग्यो ध्वनिरिति कोऽर्थः ? सोदाहरणं निरूपयत ।

–अनुवर्तते

## III. यथारुचि अष्टौ परिहरत 08x10=40

१. करुणादौ सुखं वर्तते न वा ?

२. अनुभावो नाम कः ?

३. विदूषकलक्षणं किम् ?

४. मध्या-प्रगल्भानायिकयोः कः भेदः ?

५. शान्तस्य रसत्वं कथम् ?

६. अनौचित्यप्रवृत्तत्व आभासो रसभावयोः- विव्रियताम् ।

७. आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा
नासाग्रे नयनं तदेतदपरं यच्चैकतानं मनः ।
मौनं चेदमिदं च शून्यमधुना यद्विश्वमाभाति ते
तद्ब्रूयाः सखि योगिनी भवसि भोः किं वा वियोगिन्यसि ॥ ससन्दर्भं व्याख्यात ।

८. अर्थशक्त्युद्भवध्वनिं सोदाहरणं प्रदर्शयत ।

९. यथाग्रन्थं ध्वनिभेदः वर्णनीयः ।

१०. गुणीभूतव्यङ्ग्यं सप्तभेदं दर्शयत ।

## IV. यथाग्रन्थं चतुरः विवृणुत 04x10=40

१. यथाग्रन्थं रसस्वरूपं तदास्वादनप्रकारं च निरूपयत ।

२. नायकान् तत्सहायांश्चाधिकृत्य प्रबन्धमारचयत ।

३. नयिकाः तदलङ्काराः तासामनुरागेङ्गितानि चाधिकृत्य प्रबन्धमारचयत ।

४. व्यभिचारिभावो नाम कः ? तत्प्रभेदाश्च के ?

५. रसभेदं निरूपयत ।

६. रसाभासादिभावशबलतान्तं निरूपयत ।

७. अभिधामूलध्वनिं सप्रभेदं निरूपयत ।

८. लक्षणामूलध्वनिं सप्रभेदं निरूपयत ।

—o—